National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(65): 117-119
© 2026 NJHSR
www.sanskritarticle.com

**Dr. Sangita Mondal**
MA, PhD (visva-Bharati) in - Sanskrit,
Assistant Teacher of Sanskrit,
Birbhum, West Bengal - 731224

**Correspondence:**
**Dr. Sangita Mondal**
MA, PhD (visva-Bharati) in - Sanskrit,
Assistant Teacher of Sanskrit,
Birbhum, West Bengal - 731224

# शून्ये मेघगानमिति काव्यग्रन्थे उपमानां नव्यता

**डॉ सङ्गीता मण्डल**

**सारसंक्षेपः**

"शून्ये मेघगानमिति" काव्यग्रन्थे उपमानां नव्यता प्रकार्ये, नवीन उपमानानां अन्वेषणेन काव्ये विशेषतः दृष्टिपातः अधिकृतः अस्ति। एषः लेखः उपमानस्य महत्त्वं, तस्य कार्यप्रणालीं च प्रकाशयति, यत्र शून्यस्य प्रतीकात्मकता मेघगानस्य संवेदनस्य उपास्यते। उपमानेषु नूतनत्वस्य साधना काव्यस्य मूलतः अनुभवस्य निरूपणं सन्देशयति। अन्ततः, एषः अध्ययनः भावनात्मक तथा तात्त्विक स्तरस्य दृष्ट्या समकालीन काव्यतत्त्वानां समीक्षां प्रस्तुतयति।

**मुख्यशब्दः** शून्ये मेघगानमिति, उपमानस्य महत्त्वं, शून्यस्य प्रतीकात्मकता, काव्यतत्त्वानां समीक्षां

एकविंशतिशताब्द्यां संस्कृतसाहित्ये उत्तराधुनिकतायाः महनीयां धारामाविष्कृत्य आचार्य अरुणरञ्जनमिश्रः सर्वैः संस्कृतप्रेमिभिः स्वीकृतः स्वागतीकृतश्च। तस्य 'तव जवाधरमन्मय-रेखासु' (2018), 'नेत्रप्रान्ते निस्पन्दसमयः' (2019), 'शून्ये मेघगानम्' (2021), 'करोनाकम्पशतकम्' (2022), 'कज्जलसूर्येऽर्धदृश्या' (2023) इति काव्यग्रन्थपञ्चकं संस्कृतकाव्यजगति अभूतपूर्वं परिवर्त्तनमावहति । छन्दोरहितेषु काव्येषु अलङ्काराणां नव्यता, शब्दार्थेषु ईश्वर-सङ्केतस्य लङ्घनस्य सौन्दर्यम्, बिम्ब-प्रतीक-रूपकल्पादीनां हृदयस्पर्शी प्रयोगः, साधारणमनुष्याणां सुखदुःखादीनां कलात्मकं चित्रणं, वास्तवतावादः, उत्तराधुनिकजीवनस्य प्रतिबिम्बनं समाजे विविधाः विडम्बनाश्च तस्य काव्येषु असाधारणशैल्या प्रस्फुटन्ति। इतः पूर्वं संस्कृतकाव्यस्य गतिः, दृष्टिः, आभिमुख्यं च इदृशी नासीदिति बहूनां सहृदयानां गवेषकाणाञ्च मतम् । तदस्माकमस्मिन् प्रबन्धे कवेरस्य नव्यतायाः प्रतीकरूपेण वयं केवलं तस्य शून्ये मेघगानमिति काव्यग्रन्थे उपमानां नव्यतां प्रतिष्ठापयितुकामाः ।

उपमा भवति संस्कृतकाव्येषु बहुधा बहुभिश्च व्यवहृतोऽलङ्कारः। वाल्मीकि-कालिदासादिभिरयम-लङ्कारः सहस्रस्थानेषु कलात्मकतया परीक्षितः। उत्तराधुनिकयुगार्थं प्रस्तुतकविरस्य कीदृग् व्यवहारं प्रदर्शयति, तस्याध्ययनमस्माभिरत्र करिष्यते ।

'साम्यं वाच्यमवैधर्म्यं वाक्यैक्य उपमा द्वयो' रिति प्रसिद्धमुपमालक्षणं विहितं साहित्यदर्पणकारेण। तदत्र प्रसिद्धविषये विचारमनावश्यकमिति धिया वयं केवलं मिश्रवर्यस्य उपमोदाहरणानि प्रोक्तकाव्यात् संगृह्य तेषां कलात्मकं सौन्दर्यं नव्यत्वञ्चाविष्कर्त्तुं यतामहे। एतत्तु सत्यं यत् कुत्रापि कविः पृथग्यत्नेन सचेतनतया वा केषामप्यलङ्काराणां प्रयोगं न व्यवसाययति। तथैव तस्योपमा अपि तस्य स्वतःस्फुर्त्ततां प्रतिपादयन्ति। तथापि ताः सर्वत्र हृद्या उच्चकविप्रतिभाप्रसूता इति भान्ति। एवं 'तूलराशिमिव मामुद्भिन्नय' (उज्जीवय वेलां नीलीत्पलाम्, शून्ये मेघगानम्, पृ.131), "जलमिव ज्योत्स्ना भासमाना" (तव नाम्ना कोऽयमासीन्नरः, शून्ये मेघगानम्, पृ.132), "अरण्ये मल्लिकालता इव निर्वासिता" (श्रावणपथिकः, शून्ये मेघगानम्, पृ.112),"कलङ्कबीजानि/मत्पल्यङ्के सर्षपबीजानीव/विच्छुरितानि ।"/

(आकाशनाम्ना..., शून्ये मेघगानम्, पृ.107), "उत्तरीयमिव आत्मच्छायां शरीरे आवेष्टय्य..." (निर्जरवटमूले उषिताऽहम्, शून्ये मेघगानम्, पृ.101), "वीणाशब्द इवावतंसानां झङ्कारः.."(तव दग्धप्रत्यययानां धूमः, शून्ये मेघगानम्, पृ.70), "तव बुद्ध इव हृदयकठोरः पाठागारः ।" (कस्यापि शङ्खस्य..., शून्ये मेघगानम्, पृ.68), "काक इव शाखासु वसामि, मृतबलाक इव भूमौ पतामि।" (काव्यार्थानां..., शून्ये मेघगानम्, पृ.21) चेत्यादिषु सरलोपमादिष्वपि स्वच्छाः सुन्दराश्च भावा उत्तलन्ति। पाठका एतासामप्युपमानां निर्मलकल्पनाप्रसूर्तिं हृदये अनुभवन्ति आस्वादयन्ति च । उपमा कदाचिन् मालोपमायाः सौन्दर्यं किञ्चिद् भिन्नरूपेण धारयित्वाऽपि विशेषं काव्यचमत्कारितां जनयन्ति। उदाहरणतः शयने प्रविशन्ति चन्द्ररश्मयः, इति कवितायां नायकस्य हासं, अधरं स्पर्शं च वर्णयितुं नायिका क्रमशः पृथक् पृथक् उपमानां प्रयोगं विधाय प्रभूतं काव्यानन्दं जनयति । सा नायकं वदति –

> वनपुष्पमिव तवाभिज्ञातहासः,
> शिशिरलिप्तकुमुददलमिव/ तवाधरः,
> वासन्तपवन इव तव/ विशृङ्खलितः स्पर्शः ।।
> (शून्ये मेघगानम्, पृ.114)

यथा वने पुष्पाणि स्मरणं कृत्वा अभिज्ञायते, तथैव नायकस्य हासस्य अर्थः मनसि पर्यालोच्य एव बोध्यते । यथा कुमुदपुष्पस्य दलेषु शिशिरबिन्दवो लग्नाः सन्तः अपार्थिवं सौन्दर्यं जनयन्ति, तथैव नायकस्य रक्तिमाधरे परिकल्पिताः आसक्तिबिन्दवः नायिकाया हृदये उल्लासं जनयन्ति । यथा च वसन्तकालिकः मलयपवनः देहे इतस्ततः स्पृशति, तथैव नायकस्य सर्वस्पर्शी हस्त इति ध्वनिः। अत्र एकस्मिन्नेव स्थाने तिस्र उपमाः पाठकान् मुग्धान् कुर्वन्ति ।

तस्यामेव कवितायां नायिकया नायकस्य नामजपः विरहजनित-दीर्घश्वासश्च अपारम्परिकोपमानप्रयोगद्वारा अत्यन्तं वर्णनानवत्वं रसध्वनिं च धारयति । तत्र नायिका वदति –

> स्थाल्यां तप्तजले यथा
> स्फुटति तण्डुलं, तथैव मन्मनसि/ तव नाम ।
> स्थालीतः यथा उत्तिष्ठति बाष्पः
> तथैवेदानीं मे श्वासः । (शून्ये मेघगानम्, पृ.115)

अत्र स्थाल्याः स्फुटितं तप्तजलं नायिकामनसः उपमानं भूत्वा तस्याः रोषं विरहोच्छ्वासं च व्यञ्जयति । तण्डुलस्य वारंवारमुपरि स्फोटनं नायकनामजपस्य उपमानं भूत्वा जपस्य निरन्तरतां द्योतयति। तथैव विरहणीनायिकायाः दीर्घश्वासाः स्थाल्या बाष्पेणोपमीयते। तेन च तस्या विरहदग्धावस्थाया व्यञ्जना शक्तिशालिनी भवति ।

मिश्रवर्यस्योपमाकलायां उपमया अलङ्कारान्तराणां प्रच्छन्नमिश्रणं एकः प्रभावमयः शिल्पः। तेन चोपमायाः अन्तरीणं सौन्दर्यं भृशं वर्धते। प्रस्तुतकवेः सर्वेषु काव्यग्रन्थेषु अस्य शिल्पस्याध्ययनं सविस्तरं कर्त्तव्यम्। अत्र केवलं वयमुदाहरणकतिपयं प्रस्तोतुकामाः। अतिशयोक्तेः सान्निध्ये उपमायाः पल्लवनं बहुत्र शोभते । 'योगिगीतं तव जन्मदिनम्' इति कवितायाम् कविः नायकस्य अतीतदिनानां घटनानां कृते नयने पतिताः वालुकणाः उपमानत्वेन प्रस्तूयन्ते। नयने पतिताः वालुकणाः यथा मानवार्थं कष्टं जनयन्ति, तथैव प्रेमसम्पर्के अतीतघटनाः। अतीतसमयस्य आम्रकुञ्जः, यागिगीतं, झञ्झा, जन्मोत्सवाश्च अधुना नायकहृदये व्यथां जनयन्ति। किन्तु ताः घटनाः नयनाभ्यन्तरे आविर्भवितु न समर्था इत्यतः असम्बन्धे सम्बन्धत्वाद् अतिशयोक्तेः परिसरोऽत्राविर्भवति। अनेनोपमायाः चातुर्यं व्यञ्जकत्वञ्च वर्धितं सत् सहृदयानाह्लादयति –

> अधुनापि नयने मे वालुकण इवाविर्भवति स
> आम्रकुञ्जः योगिगीतं, झञ्झालिङ्गनं
> तव जन्मदिनम् ।। (शून्ये मेघगानम्, पृ.38)

कदा कदा उपमा रूपकस्य वलये समृद्धतरा भवति। 'प्रियशुकपक्षिणां भ्रष्टपथारावः' इति कवितायामाकाशात् तारकाणामुल्कानां वा पतनं पुष्पाणां पतनेन सह तुल्यते । किन्तु अदृश्यतारूपकान्धकारे, अपि च अन्धकाररूपक-घननीलाञ्चले तासां पतनस्य दृश्यमधिकं प्रभावदायकं भवति। अतः रूपकालङ्कारस्य वलये उपमाया प्रस्फोटनं पाठकानां हृदये अपूर्वमानन्दं जनयति । अत्र न केवलं रूपकोपमयोर्मेलनं प्रदर्श्यते। परं उभयालङ्कारयोः जीवच्चित्रे उपमायाः समृद्धिः दर्शनीया भवति। नायको वदति –

> पुष्पाणीव पतन्ति आकाशतारकाः
> तव अदृश्यतान्धकारस्य
> घननीलाञ्चले ।। (शून्ये मेघगानम्, पृ.66)

अत्र अदृश्यतारूपकः अन्धकारः नायिकाया दूरीभवनमिङ्गितयति। तेन च विप्रलम्भशृङ्गारस्य ध्वनिः परिपोषितो भवति। पुनः बिम्बानां वलयेऽपि उपमायाः परिपोषणं प्रस्तुतकवेः काव्येषु बहुत्र दृश्यते। 'हृदये तुषारवनम्' इति कवितायां नीलकान्तत्वं मणौ अदृश्यदृष्टेः उपमानत्वं पुष्टतरं करोति – नीलकान्तमणिरिव तेऽदृश्यदृष्टिः... (शून्ये मेघगानम्, पृ.97) । तथैव 'अधुनाऽह....' मिति कवितायां चुम्बकीया झञ्झा सचित्रता चेति बिम्बद्वयं दहनमित्युपमेयस्य कृते जीवनमित्युपमानं चमत्कारतया प्रस्तौति । नायिका नायकं वदति –

> ........सत्यं/ किमिदानीमपि
> चुम्बकीया झञ्झाऽऽविर्भवति, या
> मम सकलदहनानि सचित्रजीवनमिव
> प्रदर्शयितुं शक्ष्यति? (शून्ये मेघगानम्, पृ.119)

कदाचिद् उपमा एकस्मिन्नेव वाक्ये परिपूर्णो न भूत्वा प्रसङ्गाश्रिता भवति। अतस्तत्र उपमायाः आस्वादनं एकाधिकवाक्यानां पठनेन पूर्णं भवति। तद्यथा 'तथापि त्वमागच्छ' इति कवितायां पवनस्य कृते मुक्तवृषभ उपमानं भवति । किन्तु उपमेयस्य पवनस्य पूर्णपरिचयः उपमानोपमेययोः साधारणधर्मश्च तदा ज्ञायते यदा तत्रत्यवाक्यान्तरं वाक्यांशान्तरं वा पठ्यते –

> अस्माकं प्रासादस्य प्रग्रीवः/ त्वां स्मरति । स्मरति च त्वां/
> तद्दिनस्य भयातुरः पवनः, य/ इदानीं मुक्तवृषभ इव/

पूर्यां समुद्रवेलाभूमौ भ्रमति ।
ममाप्यनुनयं मुखं भ्रामयन्नवजानाति ।
(शून्ये मेघगानम्, पृ.102)

अस्य कारणं भवति, ईदृक् प्रसङ्गेषु पूर्णवाक्यं न लिखित्वा कविः सर्वनाम व्यवहरति, पाठकानां बोधाय वाक्यांशं वा त्यजति । अस्योदाहरणान्तरं 'मूकवज्रनादः कोऽपि' इति कवितातो दीयते –

क्रन्दनशीलः पवनः/ पाटयति नीलनीलमदनपत्राणि ।/
पवनदरेण तानि अधुना दोलायन्ते/
पलाशवृक्षशाखासु, डीयन्ते/ वर्णहीनप्रचण्डरौद्रेषु ।/
उच्चारिताः शब्दा इव पतन्ति/ अस्माकं गृहस्य/
निरपेक्षचतुष्काष्ठेषु ।।// (शून्ये मेघगानम्, पृ.61)

मिश्रवर्यस्य उपमाः अत्यन्तमसाधारणत्वं असाधारणकल्पनां च प्रतिपादयन्ति। लिपिमालाः फिनिक्स्- पक्षी इव भवन्ति।[1] वसन्तपक्षिणी नायकस्य हृदयश्वास इव भवति ।[2] समयो मृतपोताश्रय इव भवति ।[3] उल्लासस्य वेलः हृदयमिव भङ्गुरः भवति, असत् प्रेत इव च भवति ।[4] पाठागारः बुद्ध इव भवति ।[5] स्मृतिः चक्रवात्या इव भवति ।[6] अनस्तित्वं हिमालयगुहाकाश इव भवति ।[7] पाषाणस्य भाषणं नायकस्यानुपस्थितिरिव भवति ।[8] जवापुष्पाणि रक्ताक्षराणीव भवन्ति ।[9] नायिकायाः स्थितिः दीपस्य घृतमिव भवति ।[10]

अरुणरञ्जनमिश्रस्य उपमाः संस्कृतसाहित्यस्य उपमापरम्परामतिक्रम्य अग्रे गच्छति। अत्र कल्पनानां नावीन्यम्, जीवनानुभूतेः गभीरता, रससहायकत्वं वस्तुध्वनिप्रचोदकत्वञ्च काव्यविदग्धैः सहृदयैः अनुभूयते ।

**अन्त्यटीकाः**

1. ताः प्रथमदिनस्याक्षर- लिपिमालार्या
वारंवारं म्रियन्ते फिनिक्स्पक्षीव
पुनराविर्भवितुं रन्तृसंन्यासिनः / यज्ञभस्मानले ।।
- नयनतारकासु समुद्रविक्षोभः, शून्ये मेघगानम्, अरुणरञ्जनमिश्रः, पंकज-पुस्तक-मन्दिरम्, देहली, 2021, पृ.17.
2. सर्वेभ्यो वस्तुभ्यश्चन्द्रामृतस्य पीतवाष्प उतिष्ठति, हृदयश्वास इव मे/ वसन्तपक्षिणी..
- नष्टकङ्कतिका, तत्रैव, पृ.47.
3. काचचषकमिव च समयः विचूर्णितः
मृतपोताश्रय इव ऊर्ध्वश्वासेऽस्थिरः ।
- मृतपोताश्रय इव मे समयः, तत्रैव, पृ.55.
4. सत्यं स उल्लासस्य वेलः
हृदयमिव भङ्गुरः । असत् प्रेत इव निजभस्माभिभूतः...
- हृदयमिव भङ्गुरो वसन्तस्य वेलः, तत्रैव, पृ.58
5. त्यक्तस्तव बुद्ध इव हृदयकठोरः पाठागारः ।
- कस्यापि शङ्खस्य झञ्झासिक्तं गानम्, तत्रैव, पृ.67
6. चक्रवात्या इव तव स्मृतिः समक्षं भ्रमति ।
- उल्काभृष्टो वृक्षः, तत्रैव, पृ.72.
7. अधुना ममादृश्यजीवनेन सह खेलति तव
हिमालयगुहाकाश इव शान्तम्
आत्मभार-दान्तमनस्तित्वम् ।।
- स्वप्ननद्याः समुद्रवन्दना, तत्रैव, पृ.74.
8. त्वत्स्थाने भित्तयः प्रस्तुवन्ति
तवानुपस्थितिरिव दुर्बोध्यं
पाषाणभाषणम्, - हृदये तुषारवनम्, तत्रैव, पृ.97.
9. मम शरीरस्य/ घनारण्येषु रक्ताक्षराणीव प्राप्य
तव निविडस्पर्शानां जवापुष्पाणि ।
- मधुदग्धपत्राणां श्रावणे, तत्रैव, पृ.110
10. दीपे यथा घृतं दह्यते न तूलम्,
तथैव मे स्थितिः ।। - अधुनाऽहं शृङ्खलिता सन्ध्यावर्तिः, तत्रैव, पृ.118.